च शतं चेत्युपक्रम्य "अर्बुदं चन्यर्बुदञ्च इति यजु० १७,२। ४पर्व्वतभेदे ५असुरभेदे च पु० । "महान्तं चिदर्बुदं निक्रमी पदा" ऋ० १,५१,४, ६काद्रवेये सर्पभेदे पु०पञ्च-मेऽहनीत्युपक्रम्य "अर्बुदः काद्रवेयो राजेत्याह तस्य सर्पाविशः" इति शत०ब्रा०। अम्बूनि ददाति दा—क वेदे मस्य रः । ७मेघे "न्यर्बुदं वावृधानो अयुः ऋ०२,११, २०, "अम्बूनि ददातीत्यर्बुदो मेघः" भा० अर्बुदाकारत्वात् गर्भस्य ८मांसपिण्डभेदे" "यदि पिण्डः पुमान्, स्त्री चेत् पेशी,नपुंसकेऽर्बुदमिति" सुश्रु०द्वितीयमासिकगर्भमात्रे न०"प्रथमे मासि संक्लेदभूतो धातुविमूर्च्छितः। मास्यर्बुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः" या०स्मृ० "द्वितीये तु मासि अर्बुदमीषत्कठिनं मांसपिण्डमयं भवति" मिता०।

**अर्बुदि** पु० अर्बुदमिवाचरति अर्बुद+क्विप् इन् । सर्व्वव्यापके ईशाने । "अर्बुदिर्नाम योदेवईशानश्च न्यर्बुदिः । याभ्या-मन्तरिक्षमावृतमियं च पृथिवी मही" अथ० ११,९,४ ।

**अर्भ** पु० ऋ—भ १बालके। २अल्पे च। "नार्भादीषते न महो-विभाती । ऋ०१,१२४,६, "अर्भात् अल्पात्" भा० । "इन्द्रमर्भे हवामहे" ऋ०१,७।५ । अर्भे स्वल्पेऽपि धने निमित्तभूते" भा० । "यूयं महेन एनसोयूयमर्भात्" ऋ०८,४७,८, "अर्भात् अल्पात् एनसः" भा० ।

**अर्भक** पु० अर्भएव स्वार्थे कन् । १बालके, "महद्भ्यो नमो अर्भकेभ्यो नमोयुवभ्यः"ऋ०१,२७,१३। "हृङ्गमप्युचितनिद्र मर्भकम्" माघः "अर्भकेन कुमारकोऽधितिष्ठन्नवं रथम्" ऋ०८,६९,१५ । २मूर्खे च ३कृशे, ४अल्पे, "नमो "नमोमहद्भ्योऽर्भकेभ्यो नमोवः" यजु० १६,२६ । त्रि० "अर्भकौकस्त्वात्तद्व्यपदेशाच्च"शा०सू०। अर्भकमल्पम् भा० "यथा सर्व्वगतमपि सद्व्योम सूचीपाशाद्यपेक्षयाऽर्भ-कौकः एवं ब्रह्मणोऽपि अर्भकौकस्त्वम्"भा० ५सदृशे च त्रि०

**अर्भग** त्रि० अर्भमल्पं गायति गै-शब्दे च । बालके । "यावर्भ-गाय विमदाय" ऋ० १,११६,१ ।

**अर्म्म** न०ऋ—मन् । चिरन्तनग्रामनगरादौ "अर्म्मे चावर्णे द्व्यच् त्र्यच्" पा० गुप्तार्म्मं कुक्कुटार्म्मं अवर्णे किम् बृहदर्म्मं द्व्यच् त्र्यच् किम् कज्जलार्म्मम् अमहन्नवमित्येव । महानवा-र्म्मम्। नेत्ररोगभेदे पु०न० । स च पञ्चविधः प्रस्तार्य्यर्म्म-शुक्लार्म्म रक्तार्म्ममांसार्म्मस्नाय्वर्म्मभेदात् । तल्लक्षणं नान्ता-र्म्मशब्दे वक्ष्यते सुश्रुते तु नान्ततया पठितम् । अर्य्यते गम्यते कर्म्मणि मन् ।२गन्तव्यदेशे ।कुत्सिते कन् । अर्म्मकः अरणीये कुत्सितस्थाने ४श्मशानादौ "वैलस्थानके अर्म्मके महारथ्यस्ये अर्म्मके" ऋ० १,१३३,३। "अर्म्मके श्मशानादौ" भा० ।

**अर्म्मण** पु० ऋ—बा०मन् । वैद्यकोक्ते द्रोणपरिमाणे।

**अर्म्मन्** न० ऋ+मनिन् । नेत्ररोगभेदे "प्रस्तारिशुक्लक्षतजाधि मांसस्नाय्वर्म्मसंज्ञाः खलु पञ्च रोगाः। स्युःशुक्तिका चार्ज्जुन पिष्टकौ च जालं सिराणां पिड़काश्च याः स्युः। रोगा बला सम्प्रथितेन सार्द्धमेकादशाक्ष्णोः खलु शुक्लभागे । प्रस्तारि प्रथितमिहार्म्म शुक्लभागे विस्तीर्णं तनुरुधिरप्रभं सनीलम् । शुक्लाख्यं मृदु कथयन्ति शुक्लभागे सश्वेतं सममिह वर्द्धते चिरेण । यन्मांसं प्रचयमुपैति शुक्लभागे पद्माभं तदुपदिशन्ति लोहितार्म्म । विस्तीर्णं मृदु बहलं यकृत्प्रकाशं श्यावं वा तदधिकमांसजार्म्म विद्यात् । शुक्ले यत् पिशितमुपैति वृद्धिमेति, इति सुश्रु० । अर्म्म यज्जालवद्व्यापि तदप्युन्माज्यर्लम्बितम् । अर्म्म चाल्पन्दधिनिभन्नीलं रक्तमथापि वा । छेद्यमेव तदर्म्म-स्यात् कृष्णमण्डलगञ्च यत्" । अर्म्मवन्मण्डलाग्रेण वड़ि-शेनावलम्बिना । अर्म्माणि पिड़कां हन्यात्सिराजालानि तेन वै" इति च सुश्रु० ।

**अर्य्य** त्रि०ऋ—यत् ।१स्वामिनि २वैश्ये पुंस्त्री । स्त्रियां टाप् । अर्य्या वैश्यजातिस्त्रियां स्वामिन्याञ्च । पत्यान्तु ङीप् । अर्य्यी । वैश्यपत्न्याम् तत्र आनुक् ङीप् चार्य्याणीत्यपि "अर्य्यः स्वामिवैश्ययोः"पा०"अर्य्यक्षत्रियाभ्यां वा" वार्त्ति०। अर्य्याणी अर्य्या स्वामिनी वैश्या वा पुंयोगे तु ङीप् सि० कौ०। ३श्रेष्ठे त्रि० । "प्र तत्ते अद्य शिपिविष्ट नामार्यः ऋ० ७,१००,५, "सुभद्रमर्य्यभोजनं बिभर्षि" ८,१,३४, अर्य्यते पूज्यते बा०यत् । ४पूजनीये । "कृष्णादु-दस्थादर्य्या" ऋ० १,१२३, १ । "अर्य्या अरणीया पूजनीया" भा०।

**अर्य्यमन्** पु० अर्य्यं श्रेष्ठं मिमीते मा—कनिन् । १सूर्य्ये, तद्देवताके २उत्तरफल्गुनीनक्षत्रे, ३अर्कवृक्षे, ४पितृणां राजनि "पितृणामर्य्यमा चास्मि" गीता । द्वादशा-दित्यमध्ये ५आदित्यभेदे च । "धातार्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा । इन्द्रोविवस्वान् पूषा च पर्जन्यो-दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्योज घन्यजः इति विष्णुध० पु० एत एव कश्यपाददित्यां जाताः । भारते तु "अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः । ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत । धाता मित्रोऽर्य्यमा शक्रः वरुणस्त्वंशुरेव च ।